Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

संस्कृत-
# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १९ अङ्क : २२१
सप्टेम्बर - २०२४


EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### धृतराष्ट्र उवाच




भगवद्गीतायाः प्रारम्भः धृतराष्ट्रस्य स्वार्थलिप्तेन प्रश्नेन भवति । 'मामकाः' उच्चारणेन सह तस्य हृद्गताः भावाः आविर्भवन्ति । एवं प्रारम्भः भेदवृत्तितः भवति । सञ्जयस्य अभिप्रायेण सह एतस्य संवादस्य समाप्तिः भवति । यत्र कृष्णार्जुनयोः सान्निध्यं भवति तत्र विजयः निश्चतः एव इति सञ्जयस्य मतम् । किञ्च यदा अर्जुनः आत्मानं कृष्णात् भिन्नं न मन्यते तदा द्वयोः अभेदः जायते । यत्र अभेदवृत्तिः भवति तत्र मोहादयः दुर्गुणाः स्थातुं न शक्नुवन्ति ।

किन्तु अपरस्मिन् पक्षे धृतराष्ट्रस्य स्थितिः विपरीता दृश्यते । धृतराष्ट्रः अन्तं यावत् 'मामकाः' पदं विस्मर्तुं न शक्नोति । तस्य भेदवृत्तिः जडीभूताः इव भाति । अत्र शङ्का भवितुम् अर्हति । कृष्णार्जुनयोः संवादं यथा सञ्जयः, तथैव धृतराष्ट्रः अपि श्रुतवान् । तथापि धृतराष्ट्रस्य बोधः किमर्थं न अभवत् ? वस्तुतः धृतराष्ट्रः विवेकात् सुदूरे आसीत् । सः अन्धः आसीत् । परन्तु अन्धः मनुष्यः विवेकहीनः भवति इति न । धृतराष्ट्रः अक्षिभ्याम् अन्धः आसीत्, तेन सह मनसा अपि अन्धः एव आसीत् । तस्य मानसम् आन्ध्यं सर्वनाशस्य कारणम् अभवत् । धृतराष्ट्रं वयं मोहान्धं वक्तुं शक्नुमः ।

अद्यापि बहुशः धृतराष्ट्राः अस्मिन् धरातले जीवन्ति । यः मामक-तावकयोः मध्ये भेदं द्रष्टुं शक्नोति, किन्तु उत्तम-अधमयोः मध्ये भेदं पारयितुं न शक्नोति सः अद्यतनः धृतराष्ट्रः एव । भारते बहुषु राजनेतृषु धृतराष्ट्रवृत्तिः वर्तते । राजनेतृणाम् अधमाः कुपुत्राः निःशेषान् नियमान् वशीकृत्य प्रजाः पीडयन्ति । भर्तृहरेः श्रद्धा वर्तते यत् विवेकभ्रष्टानां शतमुखः विनिपातः भवति । एतेषां विनिपातः कदा भविष्यति ?

# नवकोटिनारायणः

**– जातककथा**



पूर्वं काशीराज्यं ब्रह्मदत्तः नाम राजा पालयति स्म । तस्मिन् काले तत्र महाधनिकः कश्चन निवसति स्म । नवकोटिः रूप्यकाणि यदा सम्पादितानि तदा एव कश्चन पुत्रः प्राप्तः तेन । अतः धनिकः स्वपुत्रस्य नाम निश्चितवान् यत् 'नवकोटिनारायणः' इति । धनिकः पुत्रस्य सर्वाः अपि इच्छाः अवश्यं पूरयति स्म । एतस्य परिणामतः नारायणः उद्धतः दुष्टस्वभावयुक्तः च जातः ।

यदा सः प्राप्तवयस्कः जातः तदा पित्रा तदीयः विवाहः अपि निर्वर्तितः । ततः स्वल्पे एव काले धनिकः मरणं प्राप्तवान् । आ बाल्यात् एव नारायणः धनव्यवहारविषये निग्रहवान् न आसीत् । अतः अल्पे एव काले पित्रार्जिता तदीया समग्रा सम्पत्तिः विलुप्ता जाता । तथापि तेन अपव्ययस्य निवारणं न चिन्तितम् । अतः अल्पे एव काले महान् ऋणभारः अपि तस्य उपरि आपतितः । ऋणदातारः ऋणप्रत्यर्पणविषये पौनःपुन्येन अनुरोधम् आरब्धवन्तः । ऋणप्रत्यर्पणाय कोऽपि मार्गः न दृष्टः अकिञ्चनेन नारायणेन ।

बहुधा विचिन्त्य सः ऋणदातॄन् अवदत् – "महाशयाः ! अहं गङ्गातीरे स्थितस्य वटवृक्षस्य समीपं गच्छन् अस्मि । पूर्वजैः निखातः निधिः अस्ति तत्र । अतः भवन्तः सर्वे ऋणव्यवहारसम्बद्धानि सर्वाणि पत्राणि स्वीकृत्य तत्र आगच्छन्तु" इति ।

धनं प्राप्येत इति चिन्तयन्तः ते ऋणपत्रैः सह गङ्गातीरं प्राप्तवन्तः । नारायणः निधेः अन्वेषणस्य अभिनयं कृतवान् । मध्यरात्रपर्यन्तं तेन अन्वेषणं कृतम् । अन्ते सः 'जय परमेश्वर !' इति उच्चैः उक्त्वा गङ्गानद्यां कूर्दितवान् ।

तेषु दिनेषु बोधिसत्त्वः गङ्गातीरे स्थिते आम्रोद्याने हरिणरूपेण वसति स्म । तस्य वैशिष्ट्यं नाम तदीयं शरीरं सुवर्णकान्तियुक्तम् आसीत् ।

रक्तवर्णीयाः खुराः, रजतमये शृङ्गे, वज्रमणी इव शोभमाने नेत्रतारके च आसन् तस्य । नद्याः मध्यप्रदेशे तेन मानवस्य कस्यचित् क्रन्दनं श्रुतम् । सः ध्वनिम् अनुसरन् नदीतीरं गतवान् । ततः नदीम् अवतीर्य तरन् नारायणसमीपं गत्वा – "अयि वत्स ! अलं भीत्या । मम पृष्ठस्य उपरि उपविशतु तावत्" इति वदन् सः नारायणं पृष्ठे आरोप्य स्वनिवासं प्रति अनयत् । ततः अरण्यतः फलानि आनीय तस्मै समार्पयत् सः ।

यदा नारायणः स्वस्थः जातः तदा हरिणः अवदत् – "वत्स ! अहं भवन्तम् एतस्मात् अरण्यात् नीत्वा भवद्राज्यप्राप्त्यर्थं मार्गं दर्शयिष्यामि । स्वगृहं गत्वा सुखेन जीवतु भवान् । किन्तु अहम् अत्र अस्मि इति कोऽपि न जानीयात् । राजा अन्यः कोऽपि वा सानुरोधं पृच्छति चेदपि, महान्तं लोभं दर्शयति चेदपि भवता तु मद्वासरहस्यं कथमपि न प्रकाशनीयम्" इति । नारायणः एतत् अङ्गीकृतवान् । ततः हरिणः तं पृष्ठे उपवेश्य काशीगमनमार्गे अत्यजत् ।

यस्मिन् दिने तेन काशी प्राप्ता तस्मिन् दिने तत्र काचित् अपूर्वा घटना घटिता । राज्ञी स्वप्ने कञ्चित् सुवर्णहरिणम् अपश्यत् । सः हरिणः स्वप्ने तां धर्मम् उपादिशत् अपि ।

राज्ञी राजानम् एतं वृत्तान्तं श्रावयित्वा ''तादृश: हरिण: लोके कुत्रापि स्यात् एव। तस्य दर्शनं प्राप्तं चेदेव मम प्राणा: रक्षिता: भवेयु:, न अन्यथा। अत: भवान् तस्य अन्वेषणं कारयतु'' इति अवदत्।

राज्ञ्या: एतस्या: अपेक्षाया: पूरणाय राज्ञा कश्चन उपाय: चिन्तित: । गजस्य उपरि स्थापिते वरण्डके स: सहस्रसुवर्णनाणकात्मकं ग्रन्थिं स्थापितवान्। तत: राजधान्यां सर्वत्र तस्य गजस्य यात्रा कारिता। स: अघोषयत् यत् य: सुवर्णहरिणवार्ताम् आनेष्यति तस्मै एतानि सुवर्णनाणकानि मया उपायनीकरिष्यन्ते इति।

एतां वार्तां नारायण: अशृणोत् । दुराशाग्रस्त: स: झटिति एव सेनापतिसमीपं गत्वा –''महाशय ! अहं सुवर्णहरिणवार्तां जानामि। अत: भवन्त: मां कृपया राजसमीपं नयन्तु'' इति अवदत्।

सेनापतिना स: झटिति एव राजसमीपं नीत:। नारायण: राज्ञे सुवर्णहरिणदर्शनं निवेदितवान्।

एतस्मात् सन्तुष्ट: राजा तस्मिन् एव क्षणे तेन सह प्रस्थितवान्। नारायण: सपरिवारं राजानं हरिणवसतिसमीपं नीतवान्। स: तु तत: दूरे अतिष्ठत्।

राजपरिवारस्य उपस्थितित: तस्मिन् परिसरे महान् कोलाहल: उत्पन्न:। हरिण: एतम् अशृणोत्।

'प्राय: कोऽपि विशिष्ट: अतिथि: उपस्थित: स्यात्। तस्य स्वागतं करणीयं मया' इति विचिन्त्य स: हरिण: गुहाद्वारसमीपम् आगत्य सर्वम् अपश्यत् । राज्ञ: उपस्थितिं ज्ञात्वा स: किञ्चिदिव आश्चर्यचकित: । 'राजा एव मया द्रष्टव्य:' इति विचिन्त्य स: वेगेन तत: अधावत्।

तस्य वेगं दृष्ट्वा सर्वे आश्चर्यचकिता:। राजा अपि आश्चर्यम् अनुभवन् धनु: बाणं च हस्तेन गृहीतवान्।

तावता तस्य समीपम् आगत: हरिण: मानवभाषया अपृच्छत् – ''महाराज ! अलं बाणप्रयोगेण । मम वसतिस्थानं भवन्तं क: अवदत् ?'' इति।

श्रवणरमणीयस्य तस्य ध्वने: श्रवणात् राजा आनन्दं प्राप्तवान्। धनु: बाण: च तस्य हस्तात् स्वयम् अपतत्।

हरिणरूपी बोधिसत्त्व: पुन: अपि राजानम् अपृच्छत् – ''महाराज ! मम वसतिस्थानम् अत्र अस्ति इति क: भवन्तम् अवदत् ?'' इति। राजा हस्तसङ्केतेन दूरे स्थितं नारायणम् अदर्शयत्।

तदा बोधिसत्त्व: – ''शास्त्रेषु उच्यते यत् मानवात् अपि क्रूरतर: प्राणी लोके नास्ति इति। महाकृतघ्न: स:। पशूनां पक्षिणां च आन्तर्यं कथमपि ज्ञायेत । किन्तु मानवस्य आन्तर्यस्य अवगमनं सर्वथा असम्भवम्'' इति वदन् आत्मना कृतं नारायणस्य रक्षणं, कोऽपि न वक्तव्य: इति यत् ज्ञापितं तत् नारायणस्य कृतघ्नव्यवहारं च विस्तरेण अश्रावयत्।

एतत् श्रुत्वा नितरां क्रुद्ध: राजा – ''यद्येवं तर्हि नारायणस्य वध: कार्यते मया। तादृशा: कृतघ्ना: एतस्यां भूमौ स्थातुम् अनर्हा:'' इति अवदत् । तदा बोधिसत्त्व: तं निवारयन् – ''महाराज ! एस्य प्राणापहरणं न उचितम्। यद्येष: सजीवं तिष्ठेत् तर्हि कदाचित् वा विवेकं प्राप्य स्वस्य जीवनस्य परिष्कारं कुर्यात् अपि। अत: एतस्य वध: मास्तु। य: पुरस्कार: घोषित: तं दत्त्वा प्रेषयतु एतम्। एतत् एव न्याय्यम्'' इति अवदत्।

राजा एतत् अङ्गीकुर्वन् नारायणाय पारितोषिकं दत्तवान्। बोधिसत्त्वस्य उदारता, सहिष्णुता इत्यादय: गुणा: तेन अवगता:। अत: स: बोधिसत्त्वं महात्मानं भावयन् तं मार्गदर्शकपदे नियुक्तवान्।

# अभिषेकनाटकम् ( ग्रन्थपरिचयः )

व्योम शाहः

**अनुवर्तते**

महाकविभासप्रणीते अभिषेकनामधेये नाटके एतावता अस्माभिः दृष्टं यत् सुग्रीवं नृपरूपेण स्थापयितुं राम-लक्ष्मणाभ्यां निश्चयः कृतः। वालिसुग्रीवयोः भीषणे युद्धे श्रीरामैः प्रच्छरूपेण शरः मुक्तः। ततः वालिरामयोः संवादः अभवत्। किञ्चित् कालानन्तरं सः मृत्युम् आप्तवान्। इतः हनुमान् सागरं लङ्घित्वा लङ्कां प्राप्तवान्। तत्र प्रमदवने कालेन सीता प्राप्ता। तदैव रावणः तत्र प्रविष्टवान्। हनुमान् वृक्षस्य कोटरे सन् सर्वां वार्तां श्रुतवान्। सीता-हनुमतोः संलापः भवति। स्वीयां कुशलवार्तां रामाय निवेदयितुं सा हनुमते कथयति। हनुमान् तत्र कानने किञ्चिद् विनाशं कृत्वा निर्गतः। रावणसेवकैः प्रहारः कृतः किन्तु ते सफलाः न अभवन्।

तृतीयाङ्कस्य प्रारम्भः भग्नायाम् अशोकवनिकायां भवति। हनुमता यः विनाशः तत्र विसृष्टः, तत् श्रुत्वा रावणः स्वयं तत्र आगच्छत्। नियुक्तेभ्यः ''केन कृतम्'' इति पृष्टे तत्रागतेन वानरेण निवेदितम्। रावणेन तस्य निग्रहस्य आदेशे कृते सति शङ्कुकर्णः तस्य वानरस्य पराक्रमवर्णनं कृत्वा बलार्थं (सैन्यार्थं) पृच्छति। सेवकाः सहस्रं तत्र दत्ताः क्षणमात्रेण हताः हनुमता। रावणः कुमारम् अक्षं प्रेषयति। कालान्तरेण शङ्कुकर्णः पुनरपि प्रविश्य अधिकस्य बलस्य वाञ्छां प्रदर्शयति। कुमारस्य अक्षस्य अभिघातं श्रुत्वा कुमारः इन्द्रजित् तत्र गतः। इन्द्रजित्-हनुमतोः तुमुलं युद्धं संवृत्तम्। कुमारेण इन्द्रजिता हनुमान् पाशेन बद्धः। तं सभायां प्रवेशयितुम् आदिष्टः शङ्कुकर्णः।

विभीषणः सीतापहरणं रावणस्य नितरां मनसि गर्हते। खिन्नमपि विभीषणं रावणः हनुमन्तम् आनेतुं प्रेषयति। हनुमान् प्रविश्य स्वकीयं परिचयं कथयति। ''राघवेण प्रेषितः।'' इति श्रुत्वा रावणः तं हन्तुम् आदिष्टवान् किन्तु दूताः कदाऽपि न हन्तव्याः इति विभीषणेन सः स्मारितः। हनुमान् रामस्य सन्देशं रावणं श्रावितवान्। रावणः तु ''अहं देवान् परिजितवान्।'' इत्यादि वदन् अभिमानं वहति। तदैव हनुमान् प्रतिप्रश्नम् अकरोत् यत् किमर्थं इयान् बलशाली रावणः मायया प्रच्छन्नवेषेण सीतायाः हरणं कृतवान् इति। विभीषणः अपि हनुमतः वचनं योग्यम् इति विचिन्त्य रावणं सीतां प्रेषयितुं प्रेरयति। रावणः इतोऽपि स्वीयं गौरवं न मुञ्चति –

**''कथं लम्बसटः सिंहो मृगेण विनिपात्यते।**
**गजो वा सुमहान् मत्तः शृगालेन निहन्यते॥''**

रावणः हनुमतः पुच्छं प्रज्वाल्य विस्रष्टुं शङ्कुकर्णम् आदिशति। राक्षसैः सह हनुमान् निर्गच्छति। ततः राजसदसि विभीषणः रावणं बोधयितुं यत्नं करोति यद् एवं कृत्वा रावणेन अधर्मः बलवद्-विग्रहश्च कृतः येन अचिरात् राक्षसकुलस्य क्षयः भविष्यति। रावणः क्रुद्धः सन् विभीषणं निष्कासितुम् आदिशति। विभीषणः तु स्वयमेव निर्गत्य ततः रावणवधाय कृतपतिज्ञं रामम् उपाश्रयते –

**''अद्यैव तं कमललोचनम् उग्रचापं रामं हि रावणवधाय कृतप्रतिज्ञम्।**
**संश्रित्य संश्रितहितप्रथितं नृदेवं नष्टं निशाचरकुलपुनरुद्धरिष्ये॥''**

इतः सीताविषयकं वृत्तान्तं रावणस्य च सन्देशं गृहीत्वा हनुमान् रामस्य समीपं प्राप्नोत्। सीतावृत्तान्तं विज्ञाय रामः दुःखितः। वानरैः सह रामलक्ष्मणसुग्रीवहनुमन्तः वेलातटं सम्प्राप्ताः। विभीषणोऽपि तत्र प्राप्य हनुमन्तं दृष्टम्। सः स्वीयम् आगमनं रामाय विज्ञापयितुं हनुमन्तम् अकथयत्।

**( क्रमशः... )**

# मासवार्त्ता:

**आरब्धः 'एकलव्य-संस्कृत-एकेडेमी, केनेडा-चेप्टर' प्रकल्पः ।**






एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषायाः प्रचाराय निरन्तरं प्रयत्नं करोति । एतस्मिन् एव उपक्रमे एकलव्य-संस्कृत-एकेडेमी संस्थानेन केनेडादेशे संस्कृतभाषायाः प्रचाराय 'एकलव्य-संस्कृत-एकेडेमी, केनेडा-चेप्टर' इति कश्चन प्रकल्पः आरब्धः वर्तते । संस्थानस्य निदेशकः डॉ. मिहिरः उपाध्यायः संस्कृतभाषायाः प्रचाराय अगस्तमासस्य १ दिनाङ्कतः १८ दिनाङ्कपर्यन्तं केनेडादेशे ओन्टारियो राज्यस्य विविधेषु नगरेषु प्रवासम् अकरोत् । आयोजनेऽस्मिन् अगस्तमासस्य २ दिनाङ्के ब्राम्पटननगरे "Importance of Sanskrit in Modern Times" इति विषये, ३ दिनाङ्के "Sanskrit & Sanskriti" इति विषये, ४ दिनाङ्के बेलवेलनगरे "Influence & Need of Sanskrit in our lives" इति विषये, ८ दिनाङ्के ब्राम्पटननगरे गरवीगुजरातसंस्थाने "संस्कृतस्य महत्त्वविषये", १० दिनाङ्के सेलेडोननगरे "Bhagvad Geeta & Sanskrit" इति विषये, ११ दिनाङ्के मारखमनगरे "Bhagvad Geeta & Sanskrit" इति विषये, १२ दिनाङ्के लण्डननगरे "Importance of Sanskrit in Modern times & Shivmahimna Stotram " इति षिये, १४ दिनाङ्के किचनरनगरे "Role of Learning Sanskrit in Current Era" इति विषये, १५ दिनाङ्के "Value Education through Sanskrit" एवं च "Glimpse into the Deep Wealth of Sanskrit " इति विषये, १६ दिनाङ्के ब्राम्पटननगरे "Subhashit: Treasure of Sanskrit language" इति विषये, १७ दिनाङ्के सेलेडोननगरे सनातनमन्दिरे "संस्कृतमहत्त्वम्" इति विषये, १८ दिनाङ्के "ब्राह्मण - The Source of Knowledge" इति विषये च व्याख्यानानि सम्पन्नानि।

अत्र उल्लेखनीयं यत् अगस्तमासस्य ६ दिनाङ्कतः ९ दिनाङ्कपर्यन्तम् ब्राम्पटननगरे बालानां कृते बालसंस्कृतवर्गस्य ज्येष्ठानां कृते श्रीमद्भगवदगीतायाः श्लोकोच्चारणवर्गस्य शिवमहिम्नः स्तोत्रस्य च आयोजनम् अभवत् । एतेषु कार्यक्रमेषु ४४ छात्राः भागम् अवहन् । अत्र उल्लेखनीयं यत् डॉ. मिहिर-उपाध्यायस्य निखिलस्य प्रवासस्य आयोजनं श्रीविरागः भचेचः श्रीमती खञ्जन-भचेचः च अकुरुताम् । सर्वेषु कार्यक्रमेषु जनाः सोत्साहं भागम् अवहन् ।

## कृपया हसन्तु

**रमणः - (नमनम् उद्दिश्य) भोः, अहं मम गृहसदस्येभ्यः त्रस्तोऽस्मि ।**

**नमनः - किमर्थम् ?**

**रमणः - मम गृहसदस्याः इतोऽपि घट्याः समयं ज्ञातुं न शक्नुवन्ति ।**

**नमनः - किं वक्तुम् इच्छति भवान् ? स्पष्टं वदतु ।**

**रमणः - ते प्रतिदिनं मां शीघ्रं उत्थाप्य वदन्ति, उतिष्ठतु रे, घटीं पश्यतु । कियान् समयः जातः ? इति तु पश्यतु ।**

★ ★ ★ ★ ★

**वित्तकोषात् बहिः जनसम्मर्दः आसीत् । तत्र कश्चन जनः अग्रे गन्तुं पुनः पुनः प्रयतमानः आसीत् । किन्तु जनाः तं गृहीत्वा वारं वारं पृष्ठे नुदन्ति स्म । ततः क्रुद्धः सः उच्चैः अवदत् - "सर्वे आदिनं पङ्क्तौ एव तिष्ठन्तु । अहं वित्तकोषम् एव न उद्घाटयिष्यामि ।"**

★ ★ ★ ★ ★

**शिक्षकः - (रमणम् उद्दिश्य) न्यूटनस्य नियमं वद.... ।**

**रमणः - आचार्य ! सम्पूर्णं नियमं तु न स्मरामि, किन्तु अन्तिमा पङ्क्तिः एव स्मरणे वर्तते ।**

**शिक्षकः - अस्तु, अन्तिमां पङ्क्तिम् एव श्रावय तावत्... ।**

**रमणः - 'अयं नियमः एव न्यूटनस्य नियमः कथ्यते ।'**

## सुभाषितम्

**- संस्कृतविकिपीडियाजालस्थानात्**

**यत्र सर्वेऽपि नेतारः सर्वे पण्डितमानिनः ।**
**सर्वे महत्त्वमिच्छन्ति तत्र कार्यं विनश्यति ॥**

**तात्पर्यम्** – यत्र सर्वः अपि नायकः भवितुम् इच्छेत्, यत्र सर्वः अपि आत्मानं पण्डितं मन्यते, यत्र सर्वः अपि उत्तममेव स्थानम् अपेक्षते तत्र कार्यं नष्टं भविष्यति।

**यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।**
**चित्ते वाचि क्रियायां च महतामेकरूपता ॥**

**तात्पर्यम्** – मनः यथा विद्यते तथा भवति अस्माकं वचनं, वचनानुगुणं भवति अस्माकं व्यवहारः । सज्जनानां मनः, वचनं, व्यवहाराश्च समानविधाः भवन्ति।

**यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।**
**तथा पुराकृतं कर्म कर्तारमनुगच्छति ॥**

**तात्पर्यम्** – सहस्राधिकाः धेनवः सन्ति चेत् अपि वत्सः तासु धेनुषु स्वमातुः एव समीपं गत्वा तामेव अनुसरति। तथा एव अस्माभिः पूर्वजन्मनि कृतानि कर्माणि अस्मान् अनुसरन्ति एव।

## ज्ञानसरित्

**श्यामः पटेलः**



**मानवशरीरस्य केशानां कौतुकम्** – चतुष्पदानां प्राणिनां शरीरे रोमाणि केशाश्च भवन्ति । किन्तु मानवशरीरस्य केशानां रचना ननु विशिष्टा अस्ति। केशाः मुख्यतः त्वचः रक्षणं कुर्वन्ति। अतः मस्तिष्कस्य रक्षणाय एव शिरसि अधिकाः केशाः भवन्ति। केशाः रक्षणेन सह सौन्दर्यम् अपि ददति। आगच्छन्तु! किञ्चिद् अधिकं ज्ञातुं यतामहै।

मानवशरीरे अतिवेगेन वर्धमानं द्रव्यं केशः अस्ति। एकस्मिन् दिने एव केशः प्रायः ५ मिलिमीटरमितं वर्धते। केशः सुदृढः भवति। केशस्य उपरि १०० ग्राममितः भारः लम्बितः भवितुं शक्नोति। केशाः उष्मणः अवरोधकाः सन्ति । अतः घर्मात् शैत्याच्च अस्माकं रक्षणं कुर्वन्ति । केशाः त्रिस्तरीयाः भवन्ति येषु बाह्यस्तरः 'क्युटिकल', मध्ये स्थितः स्तरः 'कोर्टेक्स' तथा च अन्तःस्थः स्तरः 'मेड्युला' उच्यते। वस्तुतः केशाः 'केरोटिन' नामकस्य प्रोटिन–द्रव्यात् निर्मिताः भवन्ति। एते मृतकोषैः एव निर्मिताः भवन्ति। केशेषु ५० प्रतिशतं 'कार्बन' तत्त्वं, २१ प्रतिशतं 'ओक्सिजन', १७ प्रतिशतं 'नाइट्रोजन', ६ प्रतिशतं 'हाइड्रोजन' तथा च ५ प्रतिशतं 'सल्फर' इत्यादि भवति।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **हेरम्बः** | गणपति | Ganesh |
| **शैवलिनी** | नदी | River |
| **वारांनिधिः** | समुद्र | Ocean |
| **अपोहः** | हटाना | Removing |
| **वितर्कः** | दलील | Argument |
| **शब्दग्रहः** | कर्ण | Ear |
| **निर्ह्रादः** | ध्वनि | Sound |
| **अनारतम्** | अनवरत | Uninterrupted |
| **शाश्वतिकः** | सनातन | Eternal |
| **महौजाः** | ताकतवर | Powerful |
| **शालूरः** | मण्डुक | Frog |
| **विरूपाक्षः** | शिवजी | Shivji |
| **भविकः** | उपयुक्त | well-meaning |
| **जिह्मः** | कुटिल | Crooked |
| **उन्दुरुः** | चूहा | Mouse |

## किं भवन्तः जानन्ति ?

**१ ) महाभारतकालीनं हस्तिनापुरं सम्प्रति केन नाम्ना प्रचलितं वर्तते ?**
(क) दिल्ली (ख) मेरठ (ग) मुरादाबाद (घ) बागपत

**२ ) आदिशङ्कराचार्यः कस्मिन् प्रान्ते अवतारं स्वीकृतवान् ?**
(क) केरले (ख) मध्यप्रदेशे (ग) तमिलनाडुराज्ये (घ) आन्ध्रप्रदेशे

**३ ) श्रीरामः शिवलिङ्गस्य स्थापनां कुत्र अकरोत् ?**
(क) चित्रकूटे (ख) गयायाम् (ग) प्रयागे (घ) रामेश्वरे

**४ ) भारते चतुर्षु धामसु पश्चिमदिशि स्थापितं धाम किं वर्तते ?**
(क) द्वारिका (ख) कन्याकुमारी (ग) वैद्यनाथः (घ) जगन्नाथः

**५ ) भारते चतुर्षु धामसु उत्तरदिशि स्थापितं धाम किं वर्तते ?**
(क) बदरीनाथः (ख) जगन्नाथः (ग) द्वारिका (घ) वैद्यनाथः

**६ ) भारते चतुर्षु धामसु दक्षिणदिशि स्थापितं धाम किं वर्तते ?**
(क) रामेश्वरम् (ख) बदरीनाथः (ग) कन्याकुमारी (घ) जगन्नाथः

**७ ) एतेषु राज्येषु किं राज्यं चन्दनाय प्रसिद्धं वर्तते ?**
(क) केरलम् (ख) कर्नाटकम् (ग) आन्ध्रप्रदेशः (घ) प.बङ्गालः

उत्तराणि – (१) ख (२) क (३) घ (४) क (५) क (६) क (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Online / Offline**

**Admission Open**

## संस्कृतभाषाशिक्षणम्

### First Level

**Date :** 02/09/24 to 30/11/24
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

### Third Level

**Date :** 02/09/24 to 30/11/24
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા ઈચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઈચ્છો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજિત

## "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતા :**

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડૉ. મિહિર ઉપાધ્યાય **9824616237**

## संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006